# Kshamashodashistotram

# क्षमाषोडशिस्तोत्रम्

## Document Information

Text title : Kshamashodashistotram

File name : kShamAShoDashistotram.itx

Category : misc

Location : doc_z_misc_general

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : Ramanuja Stotramala

Latest update : November 23, 2019, July 5, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 5, 2021

*sanskritdocuments.org*

# क्षमाषोडशिस्तोत्रम्

श्रीवेदव्यासभट्टार्यपुत्ररत्नैः श्रीवेदाचार्यभट्टैरनुगृहीता
श्रीरस्तु ।
श्रीमते हयग्रीवाय नमः ।
श्रीमते रामानुजाय नमः ॥

यश्चक्रे रङ्गिणस्स्तोत्रं क्षमाषोडशिनामकम् ।
वेदव्यासस्य तनयं वेदाचार्यं तमाश्रये ॥

श्रीरङ्गेश! यया करोषि जगतां सृष्टिप्रतिष्ठाक्षयान्
अत्रामुत्र च भोगमक्षयसुखं मोक्षं च तत्तत्तृषाम् ।
त्वत्स्वातन्त्र्यमपोह्य कल्पितजगत्क्षेमाऽतिहृद्या स्वतः
क्षान्तिस्ते करुणासखी विजयतां क्षेमाय सर्वात्मनाम् ॥ १॥

पापानां प्रथमोऽस्म्यहं भवति चेच्छास्त्रं प्रमाणं परं
श्रीरङ्गेश ! न विद्यतेऽत्र विशयस्सन्त्येव ते साक्षिणः ।
पृष्ट्वा तानधुना मयोदितमिदं सत्येन गृह्येत चेत्
सत्यं ह्युक्तमिति क्षमस्व भगवन् सर्वं तदस्मत्कृतम् ॥ २॥

त्वत्क्षान्तिः खलु रङ्गराज ! महती तस्याः पुनस्तोषणे
पर्याप्तं न समस्तचेतनकृतं पापं ततो मामकम् ।
लक्ष्यं नेति न मोक्तुमर्हसि यतः कुत्रापि तुल्यो मया
नान्यस्सिद्ध्यति पापकृत् तदधुना लब्धं तु नोपेक्ष्यताम् ॥ ३॥

पुण्यं पापमिति द्वयं खलु तयोः पूर्वेण यत्साध्यते
तत्त्वद्विस्मृतिकारकं तनुभृतां रङ्गेश! सञ्जायते ।
पाश्चात्यस्य तु यत्फलं तदिह ते दुःखच्छिदः स्मारकं
तेनानेन कृतं तदेव शिशुनेत्यस्मत्कृतं क्षम्यताम् ॥ ४॥

पुण्यं यत्तव पूजनं भवति चेत् तत्कर्तुरिष्टे कृते

तत्स्याद्रङ्गपते! कृतप्रकृतिकृतं सर्वेऽपि तत्कुर्वते ।
पापं चेदपराध एव भवतस्तत्कर्तृसंरक्षणे
क्षान्तिस्ते निरुपाधिका निरुपमा लक्ष्येत तत् क्षम्यताम् ॥ ५॥

न द्वित्राणि कृतान्यनेन निरयैर्नालं पुनः कल्पितैः
पापानामिति मत्कृते तदधिकान् कर्तुं प्रवृत्ते त्वयि ।
तेभ्योऽप्यभ्यधिकानि तान्यहमपि क्षुद्रः करोमि क्षणात्
तद्यत्नस्तव निष्फलः खलु भवेत् तत्ते क्षमैव क्षमा ॥ ६॥

सम्भूयाखिलपातकैर्बहुविधं स्वं स्वं फलं दीयतां
सर्वं सह्यमिदं मम त्वयि हरे ! जाग्रत्यपि त्रातरि ।
दुःखाक्रान्तमवेक्ष्य मामिह जनो दुष्टाशयत्स्वद्गुणान्
क्षान्त्यादीन् प्रति दुर्वचं यदि वदेत् सोढुं न तच्छक्यते ॥ ७॥

क्षान्तिर्नाम वरो गुणस्तव महाञ्च्छ्रीरङ्गपृथ्वीपते!
सोऽयं सन्नपि सापराधनिवहाभावे न विद्योतते ।
तस्मान्नैकविधापराधकरणे निष्ठावता नित्यशः
प्राप्नोत्येष मया प्रकाशमतुलं प्राप्स्याम्यहं च प्रथाम् ॥ ८॥

मत्पापक्षपणाय योजयसि चेद्घोरेण दण्डेन मां
रङ्गाधीश्वर! केवलाघकरणाद्दुःखं मम स्यान्महत् ।
तद्द्रष्टुर्भवतोऽपि दुःखमतुलं घोरं दयालो! भवेत्
तस्मात् तेऽपि सुखायमत्कृतमिदं सर्वं त्वया क्षम्यताम् ॥ ९॥

देव ! त्वां शरणं प्रपन्नमपि मां दुःखान्यनन्याश्रयं
बाधन्ते यदि सर्वपापनिवहात् त्वां मोक्ष- यिष्याम्यहम् ।
इत्युक्तं तव वाक्यमर्थविधुरं जायेत यद्वा भवान्
तत्राशक्त इति प्रथेत हि ततो मां रक्षतु त्वत्क्षमा ॥ १०॥

न त्वं क्षाम्यसि चेदिदं मम कृतं नास्त्यत्र काचित्क्षतिः
पूर्वं यत्समभूत् तदेव हि पुनर्जायेत तज्जायताम् ।
यद्वा स्यादधिकं च सोऽपि सुमहान् लाभोऽस्तु मे तादृशः
स्वामिन् ! दासजनस्तवायमधिकं स्वैरेण दूरीभवेत् ॥ ११॥

सोऽहं क्षुद्रतया जुगुप्सिततमं दुष्कर्म नित्यं स्मरन्
कुर्वन् काममशुद्धरीतिरभवं श्रीरङ्गपृथ्वीपते! ।
एतत्ते महतो विशुद्धमनसा स्मर्तुं न युक्तं खलु क्षान्त्या

विस्मर तत्ततोऽहमसुखान्मुक्तो भवेयं सुखी ॥ १२॥

तत्तत्कर्मफलानुरूपमखिलो लोकस्त्वया सृज्यते
तस्मात्कर्मवशंवदत्वमधिकं वक्तुं तवापि क्षमम् ।
श्रीरङ्गेश्वर ! तत्प्रशान्तिविधये क्षान्त्या निराकृत्य मे
सर्वं पातकमाशु दर्शय भवत्स्वातन्त्र्यमत्यङ्कुशम् ॥ १३॥

श्रीरङ्गेश ! वचो मदीयमधुना व्यक्तं त्वया श्रूयतां
पुण्यं तत्फलसङ्गमात्रविरहाद्भूयो न मां प्राप्नुयात् ।
पापं नैव तथा फलं वितनुते शक्यं न तद्वारणं
तत्क्षान्त्या तव शक्यमेव तदियं सद्यस्त्वया कल्प्यताम् ॥ १४॥

श्रीरङ्गेश्वर! पुण्यपापफलयोः स्वाधीनतां कुर्वतोः
सर्वेषां सुखदुःखयोः स्वयमहं मग्नाशयो मामपि ।
स्मर्तुं न प्रभवामि किं पुनरहो त्वामन्तरन्तः स्थितं
तत्ते त्वं क्षमया निरस्य कुरु मे त्वद्ध्यानयोग्यां दशाम् ॥ १५॥

अल्पं चेदनवेक्षणीयसरणावारोप्यतां मत्कृतं
किञ्चिद्भूरि भवेदिदं यदि गुरून् संप्रेक्ष्य मे त्यज्यताम् ।
यद्वाऽनन्तमनन्तवैभवजुषो रङ्गक्षमावल्लभ!
त्वत्क्षान्त्याः खलु लक्ष्यतामनुगुणा- मानीयतां तत्त्वया ॥ १६॥

सन्त्यक्तसर्वविहितक्रियमर्थकाम-
श्रद्धालुमन्वहमनुष्ठितनिन्द्यकृत्यम् ।
अत्यन्तनास्तिकमनात्मगुणोपपन्नं
मां रङ्गराज! परया कृपया क्षमस्व ॥ १७॥

श्रीमान् कूरान्ववाये कलशजलनिधौ कौस्तुभाभोऽवतीर्णः
श्रीवेदव्यासभट्टारकतनयवरो रङ्गराजस्य हृद्यः ।
वेदाचार्याग्र्यनामा विदितगुणगणो रङ्गिणः स्तोत्रमेतत्
चक्रे नित्याभिजप्यंसकलतनुभृतां सर्वपापापनुत्त्यै ॥ १८॥

इति क्षमाषोडशीस्तोत्रं समाप्तम् ।

Proofread by Aruna Narayanan narayanan.aruna at gmail.com

*Kshamashodashistotram*

pdf was typeset on July 5, 2021

Please send corrections to *sanskrit@cheerful.com*